# वैयाकरणसिद्धान्तकौमुदी

## विसर्गसन्धिप्रकरणम् (३)

२२.११.२०१०

# पुनरावर्तनम्

- कुप्वोः ᳵकᳶपौ च
- सोऽपदादौ
- पाश-कल्प-क-काम्येष्विति वाच्यम्
- अनव्ययस्येति वाच्यम्
- काम्ये रोरेवेति वाच्यम्
- इणः षः
- नमस्पुरसोर्गत्योः
- इदुदुपधस्य चाप्रत्ययस्य

- मातृ – षष्ठ्येकवचने
- मातृ + ङस्
- मातृ + अस्
- मातुर् स् ('ऋत उत्'-६.१.१११ इति ऋकार-अकारयोः स्थाने उकारः एकादेशः, स च रपरः )
- मातुर् ('रात्सस्य' ८.२.२४ इति प्रत्ययसकारस्य लोपः)
- मातुः ('खरवसानयोः विसर्जनीयः' ८.३.१५)
- पूर्वान्तवद्भावेन विसर्गः प्रत्ययावयवभिन्नः । तेन 'इदुदुपधस्य...' इति षत्वे प्राप्ते,

# एकादेशशास्त्रनिमित्तकस्य न षत्वम् (वा)

- एकादेशशास्त्रनिमित्तकस्य न षत्वम्, कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् (वा) ।
- कस्कादिषु च (८.३.४८) – एतद्गणपठितेषु इण उत्तरस्य विसर्गस्य षः स्यात्, अन्यस्य सः ।
- यदि 'भ्रातुः पुत्रः' इत्यत्र 'इदुदुपधस्य चाप्रत्ययस्य' इत्येव षत्वसिद्धिः, तर्हि कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठः व्यर्थः स्यात् ।
- तेन इह न – मातुः कृपा ।

# मुहुसः प्रतिषेधः (वा)

- ’मुहुस्’ इत्यव्ययस्य षत्वं न स्यात् कुप्वोः परयोः ।
- मुहुः + कामा = मुहु⌒कामा / मुहुः कामा ।

# १५६. तिरसोऽन्यतरस्याम् (८.३.४२)

- पदद्वयम् । तिरसः, अन्यतरस्याम् ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ᳲक ᳲपौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'सोऽपदादौ' (८.३.३८) इत्यतः 'सः' इति च अनुवर्तते ।
- तिरसः – षष्ठी = तिरस् इत्यव्ययस्य
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- कुप्वोः – सप्तमी = कवर्गपवर्गयोः परयोः
- सः –प्रथमा = सकारादेशः स्यात् ।
- तिरसो विसर्गस्य सः वा स्यात् कुप्वोः ।
- तिरः + कर्ता = तिरस्कर्ता / तिरᳲकर्ता / तिरःकर्ता ।

# १५७. द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (८.३.४३)

पदद्वयम् ।

’विसर्जनीयस्य सः’ (८.३.३४) इत्यतः ’विसर्जनीयस्य’ इति, ’ कुप्वो ᳵकᳶपौ च’ (८.३.३७) इत्यतः ’कुप्वोः’ इति, ’इणः षः’ (८.३.३९) इति, ’तिरसोऽन्यतरस्याम्’ (८.३.४२) इत्यतः ’अन्यतरस्याम्’ इति च अनुवर्तते ।

कृत्वोऽर्थे वर्तमानानाम् एषां विसर्गस्य षकारो वा स्यात् कुप्वोः परयोः ।

৹ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् (५.३.१७)
৹ पञ्चकृत्वः यजते । सप्तकृत्वः स्तौति ।

৹ द्वि-त्रि-चतुर्भ्यः सुच् (५.३.१८)
৹ द्विः भुङ्क्ते । त्रिः गच्छति । चतुः पठति ।

৹ एकस्य सकृच्च (५.३.१९)
৹ सकृत् वदति ।

- द्विः + करोति = द्विष्करोति / द्विᳵकरोति / द्विः करोति ।
- कृत्वोऽर्थे किम्? चतुष्कपालः ।
- चतुर्षु कपालेषु संस्कृतः पुरोडाशः । कृत्वोऽर्थाभावात् अस्य सूत्रस्य प्रवृत्तिः न । ’इदुदुपधस्य चाप्रत्ययस्य’ इति नित्यमेव षत्वम् ।

# १५१. इसुसोः सामर्थ्ये (८.३.४४)

- पदद्वयम् ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ≍क≍पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'इणः षः' (८.३.३९) इत्यतः 'षः' इति, 'तिरसोऽन्यतरस्याम्' (८.३.४२) इत्यतः 'अन्यतरस्याम्' इति च अनुवर्तते ।
- इसुसोः विसर्गस्य षः स्याद् वा कुप्वोः परयोः ।

- सर्पिस् + करोति = सर्पिर् + करोति = सर्पिः + करोति = सर्पिष्करोति / सर्पि ᳵकरोति / सर्पिः करोति ।
- धनुष् + करोति = धनुर् करोति = धनुः करोति = धनुष्करोति / धनु ᳵकरोति / धनुः करोति ।

- सामर्थ्यमिह व्यपेक्षा ।
- सामर्थ्यं द्विधा – व्यपेक्षा, एकार्थीभावः ।
- वाक्ये व्यपेक्षा । समासे एकार्थीभावः ।
- सामर्थ्यं किम्?
- तिष्ठतु सर्पिः, पिब त्वम् उदकम् ।
- सामर्थ्याभावान्न षत्वम् ।

# १५९. नित्यं समासेऽनुत्तरपदस्थस्य (८.३.४५)

- पदत्रयम् । नित्यम्, समासे, अनुत्तरपदस्थस्य ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ॒क॒पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'इणः षः' (८.३.३९) इत्यतः 'षः', 'इसुसोः सामर्थ्ये' (८.३.४४) इति च अनुवर्तते ।
- इसुसोः विसर्गस्य अनुत्तरपदस्थस्य समासे नित्यं षः स्यात् कुप्वोः परयोः ।

- सर्पिषः कुण्डिका – षष्ठीतत्पुरुषसमासः ।
- सर्पिः + कुण्डिका = सर्पिष्कुण्डिका ।
- अनुत्तरपदस्थस्य इति किम्?
- परमसर्पिःकुण्डिका ।
- परमं चादः सर्पिः च परमसर्पिः । परमसर्पिषः कुण्डिका ।

- कस्कादिषु सर्पिष्कुण्डिकाशब्दः असमासे व्यपेक्षाविरहेऽपि षत्वार्थः, व्यपेक्षायां नित्यार्थश्च ।
- असमासे व्यपेक्षाविरहे यथा – तिष्ठतु सर्पिः, कुण्डिकामानय = तिष्ठतु सर्पिष्कुण्डिकामानय ।
- असमासे व्यपेक्षायां यथा – सर्पिः कुण्डिकायां वर्तते = सर्पिष्कुण्डिकायां वर्तते ।

# १६०. अतः कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीष्वनव्ययस्य (८.३.४६)

- पदत्रयम् । अतः, कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीषु, अनव्ययस्य ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ≍क≍पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'सोऽपदादौ' (८.३.३८) इत्यतः 'सः' इति, 'नित्यं समासेऽनुत्तरपदस्थस्य' (८.३.४५) इति च अनुवर्तते ।
- अकारादुत्तरस्य अनव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु । न तु उत्तरपदस्थस्य ।

- कृ – अयः+कारः = अयस्कारः
- कमि – अयः+कामः = अयस्कामः
- कंस – अयः+कंसः = अयस्कंसः
- पात्र – अयः+पात्रम् = अयस्पात्रम्
- कुशा – अयः+कुशा = अयस्कुशा (अयस्सहिता कुशा)
- कर्णी – अयः+कर्णी = अयस्कर्णी

- अतः किम्?
- गीःकारः
- अनव्ययस्य किम्?
- स्वःकामः
- समासे किम्?
- यशः करोति
- अनुत्तरपदस्थस्य किम्?
- परमयशःकारः

# १६१. अधःशिरसी पदे (८.३.४७)

- पदद्वयम् ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, 'सोऽपदादौ' (८.३.३८) इत्यतः 'सः' इति, 'नित्यं समासेऽनुत्तरपदस्थस्य' (८.३.४५) इति च अनुवर्तते ।
- एतयोः विसर्गस्य सादेशः स्यात् पदशब्दे परे ।
- अधः+पदम् = अधस्पदम्
- शिरः+पदम् = शिरस्पदम्

- समासे इत्येव ।
- वाक्ये न भवति ।
- अधः पदम् । शिरः पदम् ।
- अनुत्तरपदस्थस्य इत्येव ।
- परमशिरःपदम् ।

# १४४. कस्कादिषु च (८.३.४८)

- ∩क∩पयोरपवादः ।
- एषु इण उत्तरस्य विसर्गस्य षः स्यात् । अन्यस्य तु सः ।
- कः + कः = कस्कः ।
- भाः+करः = भास्करः ।
- भ्रातुः+पुत्रः = भ्रातुष्पुत्रः ।